Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 25

No. of Printed Pages – 3

**VU-88-Puranetihas**

# वरिष्ठ उपाध्याय परीक्षा, 2016

## पुराणेतिहास

**समय** : 3¼ **घण्टे**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशा :**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

1) श्रीमद्भागवत पुराणस्य रचयिता कः ? [1]

2) वाल्मीकीय रामायणस्य सुन्दरकाण्डे कति सर्गाः ? [1]

3) ईशोपनिषदि कति मन्त्राः ? [1]

4) परीक्षितः कः ? [1]

5) विद्युज्जिह्वः क आसीत् ? [1]

6) पुराणशब्दस्य कोऽर्थः ? [2]

7) यमलार्जुनौ कौ ? [2]

8) पूतना का आसीत् ? [2]

9) ''वाणी गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव – पादयोर्नः ।'' इति श्लोकस्य अर्थः कः ? [2]

10) ''नमोऽस्तुरामाय'' इति श्लोकः पूरणीयः । [2]

11) ''गर्गः पुरोहितो राजन् यदूनां सुमहातपाः'' श्लोकोऽयं कुत्र प्रसङ्गे वर्णितं केन ? [3]

12) 'उपनिषद्' शब्दस्य अर्थं विलिख्य केषाञ्चिद्
दस – उपनिषदां नामानि लेखनीयानि । [3]

13) ''इयं कनकवर्णाङ्गी रामस्य महिषी प्रिया ।
प्रणष्टापि सती यस्य मनसो न प्रणस्यति ।।'' इति श्लोकस्य व्याख्या कार्या । [3]

14) सत्यव्रतं सत्यपदं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ।
सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नः ।।
इत्यत्र श्लोकस्य स्पष्टपल्लवनं कुर्यात् । [3]

15) गोकुले भगवतो जातकर्मादिमहोत्सवः स्वसंस्कृत गिरा सप्रसङ्ग – व्याख्यातव्यः । [3]

16) दृष्टमन्तः पुरं सर्वं दृष्ट्वा रावणयोषितः ।
न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ।।
इत्यत्र श्लोकस्य यथार्थभावो लेखनीयः । [3]

17) अघासुरवधप्रसङ्गः सावतरणपूर्वकं वर्णनीयः । [3]

18) श्रीमद्भागवत पुराणग्रन्थदिशा भगवतः कथामहत्वं प्रतिपाद्यताम् । [3]

19) कृष्णयोगेश्वरः कालियविषदूषिताम्बुपानान् मृतानां गवां गोपानां च कथं पुनरुज्जीवनं ददाति इति वर्ण्यताम् । [3]

20) ''कुर्वन्नेवेह कर्माणी जिजीविशेत् शतं समाः'' इति उपनिषद्मन्त्रस्य आशयो वर्ण्यताम् । [3]

21) श्रीमद्भागवतपुराणस्य परिचयो लेख्यः । [7]

22) सुन्दरकाण्डस्य महत्वं वर्णयत । [7]

23) ईशोपनिषदः सारांशः शाङ्करभाष्यानुसारेण लिखत । [7]

24) सुन्दरकाण्डमनुसृत्य हनुमतः चरित्रं लिखत । [7]

25) श्रीमद्भागवत पुराणग्रन्थदिशा यशोदाकृष्णयोः सम्वादः ससन्दर्भोल्लेखनीयः । [7]

⌘⌘⌘

DO NOT WRITE ANYTHING HERE